अथ जम्बुद्वीपमध्ये गिरिनिवेशवशेन नवखण्डान्याह ।

'लङ्कादेशाद्धिमगिरिरुदक् हेमकूटश्च तस्मात्तस्माच्चान्यो निषध इति ते सिन्धुपर्यन्तदैर्घ्याः ।
एवं सिद्धादुदगपि पुरात् शृङ्गवच्छुक्लनीलावर्षाण्येषां जगुरिह बुधा अन्तरे रौप्यदेशान् ॥

'भारतवर्षमिदं उदगस्मात्
किन्नरवर्षमतो हरिवर्षम् ।
सिद्धपुराच्च तथा कुरु तस्माद्-
विद्धि हिरण्मयरम्यकवर्षे ॥
माल्यवांश्च यमकोटिपत्तनाद्-
रोमकाच्च किल गन्धमादनः ।
नीलशैलनिषधावधी च तौ
अन्तरालमनयोरिलावृतम् ॥
माल्यवज्जलधिमध्यवर्ति
यत्तु भद्रतुरगं जगुर्बुधाः ।
गन्धशैलजलराशिमध्यगं
केतुमालकमिला कलाविदः ॥
निषधनीलसुगन्धसुमाल्य-
कैरलमिलावृतमावृतमाबभौ ।
अमरकेलिकुलाय समाकुलं
रुचिरकाञ्चनचित्रमहीतलम् ॥'

अथ मेरुसंस्थानमाह ।

इह हि मेरुगिरिः किल मध्यगः
कनकरत्नमयस्त्रिदशालयः ।
द्रुहिणजन्मकुपद्मजकर्णि-
केति च पुराणविदः समवर्णयन् ॥
विष्कम्भशैलाः खलु मन्दरोऽस्य
सुगन्धशैलो विपुलः सुपार्श्वः ।
तेषु क्रमात् सन्ति च केतुवृक्षाः
कदम्बजम्बूवटपिप्पलाख्याः ॥
जम्बूफलामलगलद्रसतः प्रवृत्ता
जाम्बूनदीरसयुता ह्रदभूत् सुवर्णम् ।
जाम्बूनदं हि सततः सुरसिद्धसंघाः
शश्वत् पिबन्त्यमृतपानपराङ्मुखास्ते ॥
वनं तथा चैत्ररथं विचित्रं
तेष्वप्सरोनन्दननन्दनञ्च ।
धृत्याश्रयं यत् धृतिकृत् सुराणां
भ्राजिष्णु वैभ्राजमिति प्रसिद्धम् ॥
सरांस्यथैतेष्वरुणञ्च मानसं
महाह्रदं श्वेतजलं यथाक्रमम् ।
सरःसु रामारमणश्रमालसाः
सुरा रमन्ते जलकेलिलालसाः ॥
सद्रत्नकाञ्चनमयं शिखरत्रयञ्च
मेरौ सुरारिकपुरारिपुराणि तेषु ।
तेषामधः शतमखज्वलनान्तकानां
रक्षोऽम्बुपानिलशशीशपुराणि चाष्टौ ॥'

तत्र अन्यविशेषमाह ।

'विष्णुपदी विष्णुपदात् पतिता मेरौ चतुर्धासीत्
विष्कम्भाचलमस्तकशस्तसरः संगता गता वियति ।
सीताख्या भद्राश्वं सालकनन्दा च भारतं वर्षम्
चक्षुश्च केतुमालं भद्राख्या चोत्तरान् कुरून् याता ॥
या कर्णिताभिलषिता दृष्टा स्पृष्टावगाहिता पीता ।
उक्ता स्तुता स्मृता वा पुनाति बहुधापि पापिनः पुरुषान् ॥

यां चलिते दलिताखिलबन्धो
गच्छति बलमति तत्पितृसंघः ।
कृष्णतटो विजितान्तकदूतो
याति नरो निरयात् सुरलोकम् ॥'

अथ भारतवर्षमध्ये नव खण्डानि सप्त कुलाचलांश्चाह ।

'ऐन्द्रं कशेरुसकलं किल ताम्रपर्ण-
मन्यद्गभस्तिमदतश्च कुमारिकाख्यम् ।
नागञ्च सौम्यमिह वारुणमन्त्यखण्डं
गान्धर्वसंज्ञमिति भारतवर्षमध्ये ॥
वर्णव्यवस्थितिरिहैव कुमारिकाख्ये
शेषेषु चान्त्यजजना निवसन्ति सर्वे ।
माहेन्द्रशुक्तिमलयर्क्षकपारिपात्राः
सह्याः सविन्ध्य इह सप्त कुलाचलाख्याः ॥'

अथ लोकव्यवस्थामाह ।

'भूर्लोकाख्यो दक्षिणे व्यक्षदेशा-
दस्मात् सौम्योऽयं भुवः स्वश्च मेरुः ।
लभ्यः पुण्यैः खे महः स्याज्जनोऽतो-
ऽनल्पानल्पैः स्वैस्तपः सत्यमन्त्यः ॥'

दिग्व्यवस्थामाह ।

'लङ्कापुरेऽर्कस्य यदोदयः स्या-
त्तदा दिनार्धं यमकोटिपुर्याम् ।
अधस्तदा सिद्धपुरेऽस्तकालः
स्याद्रोमके रात्रिदलं तदैव ॥
यत्रोदितोऽर्कः किल तत्र पूर्वा
तत्रापरा यत्र गतः स चास्तम् ।
तन्मध्यतोऽन्ये च ततोऽखिलाना-
मुदक्स्थितो मेरुरिति प्रसिद्धम् ॥'

अथ विशेषमाह ।

'यथोज्जयिन्याः कुचतुर्थभागे
प्राच्यां दिशि स्याद्यमकोटिरेव ।
ततश्च पश्चान्न भवेदवन्ती
लङ्कैव तस्याः ककुभि प्रतीच्याम् ॥
तथैव सर्वत्र यतो हि यत् स्यात्
प्राच्यां ततस्तन्न भवेत् प्रतीच्याम् ।
निरक्षदेशादितरत्र तस्मात्
प्राचीप्रतीच्यौ च विचित्रसंस्थे ॥'

अथ भचक्रभ्रमणव्यवस्थामाह ।

'निरक्षदेशे क्षितिमण्डलोपगौ
ध्रुवौ नरः पश्यति दक्षिणोत्तरौ ।
तदाश्रितं खे जलयन्त्रवत्तथा
भ्रमद्भचक्रं निजमस्तकोपरि ॥
उदग्दिशं याति यथा यथा नर-
स्तथा तथा स्यान्नतमृक्षमण्डलम् ।
उदग्ध्रुवं पश्यति चोन्नतं क्षिते-
स्तदन्तरे योजनजाः पलांशकाः ॥
योजनसंख्या भांशैः ३६०गुणिता
कुपरिधिहृता ४९६७ भवन्त्यंशाः ।
भूमौ कक्षायां वा
भागेभ्यो योजनानि च व्यस्तम् ॥'

अथ देवदैत्यानां ध्रुवदर्शसंस्थानमाह ।

'सौम्यं ध्रुवं मेरुगताः खमध्ये
याम्यञ्च दैत्या निजमस्तकोर्ध्वे ।
सव्यापसव्यं भ्रमदृक्षचक्रं
विलोकयन्ति क्षितिजप्रसक्तम् ॥
उत्तरगोले क्षितिजादूर्ध्वं परितो भ्रमन्तमादित्यम् ।
सव्यं त्रिदशाः सततं पश्यन्त्यसुरा अपसव्यं याम्ये ॥

इन्द्रान्तमारोहति यैः क्रमेण
तैरेव हस्तैरवरोहतीनः ।
यत्रैव दृष्टः प्रथमं स देवै-
स्तत्रैव तिष्ठन् विलोक्यते किम् ॥
दिनं सुराणामयनं यदुत्तरं
निशेतरत् संहितिकैः प्रकीर्तितम् ।
दिनोन्मुखेऽर्के दिनमेव तन्मतं
निशा तथा तत्फलकीर्तनाय वै ॥
विधूर्ध्वभागे पितरो वसन्तः
स्वाधःसुधादीधितिमामनन्ति ।
पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे
दर्शे यतोऽस्माद् द्युदलं तदेषाम् ॥
कृष्णे दले पक्षदलेऽभ्युदेति
शुक्लेऽस्तमेत्य तत एव सिद्धम् ।
भार्धान्तरत्वान्न विधोरधःस्थं
तस्मान्निशीथः खलु पौर्णमास्याम् ॥
यदतिदूरगतो द्रुहिणः क्षितेः
सततमाप्रलयं रविमीक्षते ।
भवति तावदयं शयितस्य तद्-
युगसहस्रयुगं द्युनिशं विधेः ॥'

अथ भूपरिधिमानं प्राक्कथितमपि विशेषार्थमाह ।

'प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय ४९६७
स्तद्व्यासः कुभुजङ्गसायकभवः सिद्धांशके नाधिकः । १५८१।२४
पृष्ठक्षेत्रफलं यथा युगगुणत्रिंशच्छराष्टादयो ७८५३०३४
भूमेः कन्दुकजालवत् कुपरिधिव्यासाहतेः प्रस्फुटम् ॥'

भूपृष्ठफलस्य लल्लोक्तस्य दूषणमाह ।

'दृष्टं कन्दुकपृष्ठजालवदिलागोले फलं जल्पितं
लल्लेनास्य शतांशकोऽपि न भवेद्यस्मात्फलं वास्तवम् ।
तत् प्रत्यक्षविरुद्धमुद्धतमिदं नैवास्तु वा चास्तु वा
हे प्रौढ़ा गणका विचारयत तन्मध्यस्थबुद्ध्या भृशम् ॥'